श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

## श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे

# ॥ पञ्चचत्वारिंशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ पञ्चचत्वारिंशः सर्गः ॥

## सीताया मार्मिकवचसा प्रेरितस्य लक्ष्मणस्य श्रीरामपार्श्वे गमनम्

आर्तस्वरं तु तं भर्तुर्विज्ञाय सदृशं वने।
उवाच लक्ष्मणं सीता गच्छ जानीहि राघवम् ॥ **3.45.1** ॥

नहि मे जीवितं स्थाने हृदयं वावतिष्ठते।
क्रोशतः परमार्तस्य श्रुतः शब्दो मया भृशम् ॥ **3.45.2** ॥

आक्रन्दमानं तु वने भ्रातरं त्रातुमर्हसि।
तं क्षिप्रमभिधाव त्वं भ्रातरं शरणैषिणम् ॥ **3.45.3** ॥

रक्षसां वशमापन्नं सिंहानामिव गोवृषम्।
न जगाम तथोक्तस्तु भ्रातुराज्ञाय शासनम् ॥ **3.45.4** ॥

तमुवाच ततस्तत्र क्षुभिता जनकात्मजा।
सौमित्रे मित्ररूपेण भ्रातुस्त्वमसि शत्रुवत् ॥ **3.45.5** ॥

यस्त्वमस्यामवस्थायां भ्रातरं नाभिपद्यसे।
इच्छसि त्वं विनश्यन्तं रामं लक्ष्मण मत्कृते ॥ **3.45.6** ॥

लोभात्तु मत्कृते नूनं नानुगच्छसि राघवम्।
व्यसनं ते प्रियं मन्ये स्नेहो भ्रातरि नास्ति ते ॥ **3.45.7** ॥

तेन तिष्ठसि विस्रब्धं तमपश्यन् महाद्युतिम्।
किं हि संशयमापन्ने तस्मिन्निह मया भवेत्॥ **3.45.8** ॥

कर्तव्यमिह तिष्ठन्त्या यत्प्रधानस्त्वमागतः।
एवं ब्रुवाणां वैदेहीं बाष्पशोकसमन्विताम्॥ **3.45.9** ॥

अब्रवील्लक्ष्मणस्त्रस्तां सीतां मृगवधूमिव।
पन्नगासुरगन्धर्वदेवदानवराक्षसैः॥ **3.45.10** ॥

अशक्यस्तव वैदेहि भर्ता जेतुं न संशयः।
देवि देवमनुष्येषु गन्धर्वेषु पतत्रिषु॥ **3.45.11** ॥

राक्षसेषु पिशाचेषु किन्नरेषु मृगेषु च।
दानवेषु च घोरेषु न स विद्येत शोभने॥ **3.45.12** ॥

यो रामं प्रतियुध्येत समरे वासवोपमम्।
अवध्यः समरे रामो नैवं त्वं वक्तुमर्हसि॥ **3.45.13** ॥

न त्वामस्मिन् वने हातुमुत्सहे राघवं विना।
अनिवार्यं बलं तस्य बलैर्बलवतामपि॥ **3.45.14** ॥

त्रिभिर्लोकैः समुदितैः सेश्वरैः सामरैरपि।
हृदयं निर्वृतं तेऽस्तु सन्तापस्त्यज्यतां तव॥ **3.45.15** ॥

आगमिष्यति ते भर्ता शीघ्रं हत्वा मृगोत्तमम्।
न स तस्य स्वरो व्यक्तं न कश्चिदपि दैवतः॥ **3.45.16** ॥

गन्धर्वनगरप्रख्या माया तस्य च रक्षसः।
न्यासभूतासि वैदेहि न्यस्ता मयि महात्मना॥ **3.45.17** ॥

रामेण त्वं वरारोहे न त्वां त्यक्तुमिहोत्सहे।
कृतवैराश्च कल्याणि वयमेतैर्निशाचरैः॥ **3.45.18** ॥

खरस्य निधने देवि जनस्थानवधं प्रति।
राक्षसा विविधा वाचो व्याहरन्ति महावने ॥ **3.45.19** ॥

हिंसाविहारा वैदेहि न चिन्तयितुमर्हसि।
लक्ष्मणेनैवमुक्ता तु क्रुद्धा संरक्तलोचना ॥ **3.45.20** ॥

अब्रवीत् परुषं वाक्यं लक्ष्मणं सत्यवादिनम्।
अनार्याकरुणारम्भ नृशंस कुलपांसन ॥ **3.45.21** ॥

अहं तव प्रियं मन्ये रामस्य व्यसनं महत्।
रामस्य व्यसनं दृष्ट्वा तेनैतानि प्रभाषसे ॥ **3.45.22** ॥

नैव चित्रं सपत्नेषु पापं लक्ष्मण यद् भवेत्।
त्वद्विधेषु नृशंसेषु नित्यं प्रच्छन्नचारिषु ॥ **3.45.23** ॥

सुदुष्टस्त्वं वने राममेकमेकोऽनुगच्छसि।
मम हेतोः प्रतिच्छन्नः प्रयुक्तो भरतेन वा ॥ **3.45.24** ॥

तन्न सिध्यति सौमित्रे तवापि भरतस्य वा।
कथमिन्दीवरश्यामं रामं पद्मनिभेक्षणम् ॥ **3.45.25** ॥

उपसंश्रित्य भर्तारं कामयेयं पृथग्जनम्।
समक्षं तव सौमित्रे प्राणांस्त्यक्ष्याम्यसंशयम् ॥ **3.45.26** ॥

रामं विना क्षणमपि नैव जीवामि भूतले।
इत्युक्तः परुषं वाक्यं सीतया रोमहर्षणम् ॥ **3.45.27** ॥

अब्रवील्लक्ष्मणः सीतां प्राञ्जलिः स जितेन्द्रियः।
उत्तरं नोत्सहे वक्तुं दैवतं भवती मम ॥ **3.45.28** ॥

वाक्यमप्रतिरूपं तु न चित्रं स्त्रीषु मैथिलि।
स्वभावस्त्वेष नारीणामेषु लोकेषु दृश्यते ॥ **3.45.29** ॥

विमुक्तधर्माश्चपलास्तीक्ष्णा भेदकराः स्त्रियः।
न सहे हीदृशं वाक्यं वैदेहि जनकात्मजे ॥ **3.45.30** ॥

श्रोत्रयोरुभयोर्मध्ये तप्तनाराचसन्निभम्।
उपशृण्वन्तु मे सर्वे साक्षिणो हि वनेचराः ॥ **3.45.31** ॥

न्यायवादी यथा वाक्यमुक्तोऽहं परुषं त्वया।
धिक् त्वामद्य विनश्यन्तीं यन्मामेवं विशङ्कसे ॥ **3.45.32** ॥

स्त्रीत्वाद् दुष्टस्वभावेन गुरुवाक्ये व्यवस्थितम्।
गच्छामि यत्र काकुत्स्थः स्वस्ति तेऽस्तु वरानने ॥ **3.45.33** ॥

रक्षन्तु त्वां विशालाक्षि समग्रा वनदेवताः।
निमित्तानि हि घोराणि यानि प्रादुर्भवन्ति मे।
अपि त्वां सह रामेण पश्येयं पुनरागतः ॥ **3.45.34** ॥

लक्ष्मणेनैवमुक्ता तु रुदती जनकात्मजा।
प्रत्युवाच ततो वाक्यं तीव्रबाष्पपरिप्लुता ॥ **3.45.35** ॥

गोदावरीं प्रवेक्ष्यामि हीना रामेण लक्ष्मण।
आबन्धिष्येऽथवा त्यक्ष्ये विषमे देहमात्मनः ॥ **3.45.36** ॥

पिबामि वा विषं तीक्ष्णं प्रवेक्ष्यामि हुताशनम्।
न त्वहं राघवादन्यं कदापि पुरुषं स्पृशे ॥ **3.45.37** ॥

इति लक्ष्मणमाश्रुत्य सीता शोकसमन्विता।
पाणिभ्यां रुदती दुःखादुदरं प्रजघान ह ॥ **3.45.38** ॥

तामार्तरूपां विमना रुदन्तीं
    सौमित्रिरालोक्य विशालनेत्राम्।

आश्वासयामास न चैव भर्तु -
 स्तं भ्रातरं किञ्चिदुवाच सीता ॥ **3.45.39** ॥

ततस्तु सीतामभिवाद्य लक्ष्मणः
 कृताञ्जलिः किञ्चिदभिप्रणम्य च।
अवेक्षमाणो बहुशः स मैथिलीं
 जगाम रामस्य समीपमात्मवान् ॥ **3.45.40** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे पञ्चचत्वारिंशः सर्गः ॥